**DELHI PUBLIC SCHOOL , DURGAPUR**

**QUESTION BANK &REVISION SHEET FOR SA-I (2018-19)**

**SANSKRIT (2ND LANG.) CLASS - X**

## खण्ड - 'क' [अपठित - अवबोधनम्]

**क. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

जीवने सफलतायाः आधारः पुरुषार्थः एव |अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति | यदा -यदा नरः पुरुषार्थम् अचिनोत् - तदा -तदा सः सफलतां प्रप्तवान् | पुरुषार्थिनः एव संसारे विलक्षण प्रतिभाम् अर्जितवन्तः| अनेन एव ऐवरेस्ट शिखरम् अजयत् अन्तरिक्ष च अगच्छत् नरः | देशसेवयासमाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि | अस्माकम् इतिहासे तेषां गौरवगानं विद्यते | आपत्काले येषां मनांसि विचलितानि न भवन्ति ते एव जीवने सफलतां प्राप्नुवन्ति | पुरुषार्थिनां कृते तु पुरुषार्थः एव उपासना अस्ति |

I एकपदेन उत्तरत -

i. विलक्षण प्रतिभां के अर्जितवन्तः ? ii. पुरुषार्थिभिः कीदृशानि कार्याणि कृतानि ?

II पूर्णवाक्येन उत्तरत -

i. येषां मनांसि आप्तकाले विचलितानि न भवन्ति ते किं कुर्वन्ति ?

ii. जीवने सफलतायाः आधारः कः ?

III भाषिककार्यम्

i प्राप्नुवन्ति इति क्रियापदस्य कर्तृपदं किम् ?

क. पुरुषार्थी ख . पुरुषार्थिनः ग. ते घ कार्याणि

ii आलस्यम् इति पदस्यविलोमपदं गद्यांशे किं प्रयुक्तम् ?

क. विलक्षण ख. कार्यम् ग.गौरवगानं घ. पुरुषार्थः

iii अनेन एव इति सर्वनामपदं कस्मै प्रयुक्तम् इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

क. जीवनाय ख. पुरुषार्थाय ग. पुरुषार्थिने घ. सफलतायै

iv कार्याणि इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम् ?

क. विचलितानि ख. उल्लेखनीयानि ग. जीवनानि घ. जितानि

IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत |

## खण्ड : [क] [अपठित - अवबोधनम्]

**ख. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तराणि संस्कृतेन लेखानीयानि**

एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत् | उपवने पक्षिणः मधुरं कूजन्ति स्म | तेषां कलरवं श्रुत्वा सिद्धार्थः प्रसन्नः अभवत् | किञ्चित् कालानन्तरं तस्य भ्राता देवदतः अपि आखेटनाय तत्र आगच्छत् | सः बाणेन् आकाशे एकं हंसम् अविष्यत् |बाणेन विद्धः हंसः भूमौ अपतत् | सिद्धार्थःकरुणया तं हंसं कुटीरम् आनीय हंसस्य परिचर्याम् अद्रोत् | सिद्धार्थस्य देवदतस्य च मध्ये विवादः भवति यत् हंसः कस्य ? अन्ते नृपः निर्णयम् अददत् यत् हंसः सिद्धार्थस्य एव | सत्यमेव कथ्यते - रक्षकः भक्षकात् श्रेष्ठः इति |

I. एकपदेन उत्तरत |

i. हंसः कस्य ? इति निर्णयः कः अददत् ? ii. उपवने के मधुरं कूजन्ति स्म ?

II. पूर्णवाक्येन उत्तरत |

i. सिद्धार्थः भ्रमणाय उपवनं कदा अगच्छत् ? ii. हंसः कुत्र अपतत् ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत |

क. गद्यांशे अद्रोत् क्रियापदस्य कर्तृपदं किम् अस्ति ?

i. हंसः ii. सिद्धार्थः iii. देवदत्तः iv. भक्षकः

ख. किञ्चित् कालानन्तरं तस्य भ्राता ------ , इति वाक्ये तस्य सर्वनामपदं कस्मै प्रयुक्तम् ?

i. नृपाय ii. कुटीराय iii. हंसाय iv. सिद्धार्थाय

ग. गद्यांशे नृपः इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

i. अद्रोत् ii. अविध्यत् iii. अभवत् iv. अगच्छत्

घ. अनुच्छेदे सेवाम् इति अर्थे किं पदं प्रयुक्तम् ?

i. परिचर्याम् ii. निर्णयम् iii. सत्यम् iv. मधुरम्

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।

## खण्ड-[ ख ] [ रचनात्मककार्यम् ]

क. भवतः मित्रम् ऋतेशः भाषणप्रतियोगितायां प्रथमं स्थानं लब्धवान् तं प्रति लिखिते वर्धापनपत्रे रिक्तस्थानानि मञ्जूषातः उचितपदानि चित्वा पूरयत ,पत्रं च उत्तरपुस्तिकायां लिखत

विवेकानन्द छात्रावासः

डी0 पी0 एस0 विद्यालयः

i.---------------------------

दिनाङ्कः -------------------

प्रियमित्र ऋतेश !

सप्रेम ii. -------------------- ।

अत्र कुशलं तत्रास्तु । भवतः पत्रं iii.-------------------------- ज्ञातं यत् भवान् संस्कृतभाषण - प्रतियोगितायां iv.----------- -------------- स्थानं प्राप्तवान् । इदं ज्ञात्वा मम v.------------प्रसन्नम् अभवत् । मित्र ! इदं तु तव vi.--------- एव फलम् अस्ति । मम vii------------------अपि भवते वर्धापनानि कथयन्ति ।भवान् अग्रे अपि सदा सफलताः प्रकृप्नोतु , एषा मम viii---------- अस्ति पितृभ्यां मम सादरं ix.--------------- निवेदनीयाः ।

भवतः मित्रम्

x--------------

मञ्जूषा-[पठित्वा,सुधीन्द्रः,प्रणामाः,कोलकातातः,शुभकामना,परिश्रमस्य,नमस्ते,प्रथमं,मित्राणि,मनः]

ख. मित्रं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायता पूरयित्वा पुनः लिखत -

i----- ----------------

ii------------- ------ गौरव !

सस्नेहं iii ------------------ ।

गतमासे अहं iv------- मात्रा च सह भ्रमणार्थं मेघालयप्रदेशम् अगच्छम् v---------------- सौन्दर्यम् अद्भूतम् । vi---------- सुन्दरम् पर्वतीयस्थलम् । vii -------------------- वृक्षैः पर्वतैः च सुसज्जिता इयं वस्तुतः देवभूमिः एव अस्ति । इमं सुरम्यं प्रदेशं दृष्ट्वा viii --------------------- यत् पर्वताः सदैव रम्याः एव । अहं त्वया सह अपि एकवारं ix------------------- -- तत्र गन्तुम् इच्छामि । आशासे आवां शीघ्रमेव तत्र पर्वतानां मध्ये भविष्यावः । सर्वेभ्यः मम नमस्काराः कथनीयाः । शीघ्रं मिलावः ।

x--------------- मित्रम्

शिवांशु शैशवः ।

मञ्जूषा - [ भवतः, इदं, केरलतः,विशालैः,नमस्काराः,पुनः,अनुभूयते ,मेघालयप्रदेशस्य, पित्रा, प्रियमित्र ]

खण्ड-[ ख ] [चित्रवर्णनम्]

क.अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतयासंस्कृतेन पञ्चवाक्यानि रचयत-

मञ्जूषा - [ विद्यालयः,वृक्षः,चत्वारः,बालकाः,कन्दुकम्,तिस्त्रः बालिकाः, सुन्दरभवनम्,क्रीडाक्षेत्रे,सर्वांगीणविकासः]

ख.अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतयासंस्कृतेन पञ्चवाक्यानि रचयत -

मञ्जूषा-[ जलौघः, गृहाणि, ग्रामस्य, जलमग्नानि,क्षेत्राणि,अजशावकः,अतीवा दुखिताः,दयनीय दशा,बालकौ,माता]

खण्ड -[ग] [अनुप्रयुक्त - व्याकरणम्]

अधोलिखितवाक्येषु रेखांकितपदानां समुचितं संधि विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -

i <u>महर्षिः</u> वाल्मीकिः रामायणम् अरचयत् | क.मह + अर्षिः ख. महा+ऋषिः ग. महो+ऋषिःघ.महत्+ऋषिः

ii वने <u>गज + इन्द्रः</u> न आसीत् | क. गजिन्द्रः ख. गजेन्द्रः ग. गजीन्द्रः घ. गजैन्द्रः

iii राजा <u>चक्षुर्दानम्</u> अकरोत् | क. चक्षुष्+दानम् ख.चक्षुर्+दानम् ग.चक्षुः+दानम् घ.चक्षु+दानम्

iv <u>तरुच्छाया</u> सुखकरी | क. तरु+छाया ख. तरो+छाया ग. तरवः+छाया घ. तरूषु+छाया

v हरिः +इच्छा बलीयसी | क. हरेच्छा ख. हरीच्छा ग. हरिरिच्छा घ. हरिरीच्छा

अधोलिखितेषु वाक्येषु रेखांकितपदानां समुचितं समासं विग्रहं वा प्रदत्तविकल्पेभ्यःचित्वा लिखत -

i <u>विद्योत्तमा</u> नाम्नी एका विदुषी आसीत् |

क.विद्यायाम् उत्तमा ख.विद्यायाः उत्तमा ग.विद्य उत्तमा घ.विद्ये उत्तमा

ii <u>पञ्चवटी</u> महाराष्ट्रप्रदेशे अस्ति ।

क. पञ्च वटी ख.पञ्चानां वटानां समाहारः ग.पञ्च वट्यः यत्र घ.पञ्च वटाःयत्र

iii सौरभः अद्य <u>अनुपस्थितः</u> अस्ति ।

क. अन् उपस्थितः खअनु उपस्थितः ग. अनुप स्थितः घ. न उपस्थितः

iv राजा तत्र <u>दानशालाः</u> अकारयत् ।

क. दानात् शाला ख. दानं शाला ग. दानाय शाला घ. दाने शाला

v राजगृहे <u>मेषयूथम्</u> आसीत् ।

क. मेषाय यूथम् ख. मेषेभ्यः यूथम् ग. मेषाणां यूथम् घ. मेषेषु यूथम्

vi दैवज्ञः <u>पञ्चानाम् अङ्गानां समाहारः</u> पश्यति ।

क. पञ्चाङ्गम् ख. पच्चागम् ग. पच्चाग घ. पञ्चांगानि

.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति- प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्यः चित्वा लिखत -

i. <u>पठ + शतृ</u> बालकः शनैः -शनैः गच्छति ।

क. पठन् ख. पठन्तम् ग. पठतः घ. पठितवान्

ii. <u>वृध् + शानच्</u> बालिकायै दुग्धं यच्छ ।

क. वर्धमाना ख. वर्धमानायै ग. वर्धमानायाः घ. वर्धमानौ

iii. <u>मानवता</u> एकं मानवस्य भूषणम् अस्ति ।

क. मानव + त्व ख. मानव + तल् ग. मानव + टाप् घ. मानव + ङीप्

iv. वानरस्य <u>चपल + त्व</u> बालेभ्यः रोचते ।

क. चपलत्व ख. चपलत्वम् ग. चपलता घ. चपलतानाम्

v. <u>तपस्विन् + ङीप्</u> गीतं गायति ।

क. तपस्वी ख. तपस्वि ग. तपस्विनी घ. तपस्विः

. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः अव्ययपदैः पूरयित्वा लिखत -

क. सः ————— पठितुम् इच्छति ?

ख. तत्र ————— गच्छ ।

ग. ते सर्वे ————— नाटिकां द्रष्टुम् अगच्छन् ।

घ. ते ————— नूतनं पुस्तकं पठिष्यन्ति ।

ङ. त्वं कथयितुम् इच्छसि ————— सः श्वः आगमिष्यति ।

मञ्जूषा - [ यत् , मा , श्वः , कुत्र , ह्यः ]

. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत -

i. तौ <u>महिले</u> गच्छतः

क. महिलाः ख. पुरुषौ ग. पुरुषेभ्यः घ. पुरुषयोः

ii. वानराः <u>अकूर्दः</u> ।

क. अकूर्दत् ख. अकूर्दताम् ग. अकूर्दन् घ. अकूर्दत

iii. <u>अहम्</u> सेवफलं खादति ।

क. आवाम् ख. वयम् ग. त्वम् घ. सः

iv. वयं जन्तुशालां ह्यः <u>गमिष्यामः</u> ।

क. गमिष्यामि   ख. अगच्छाम्   ग. अगच्छाव   घ. गच्छामः

v. यूयं गृहं गच्छथः ।

क. त्वम्   ख. युवाम्   ग. तौ   घ. ते

Vi. वानरः कुत्र न कूर्दन्ति ?

क. कूर्दसि   ख. कूर्दति   ग. कूर्दतः   घ. कोद्तौं

प्रदत्तेषु उत्तरेषु वाच्यानुसारं यत् उत्तरं शुद्धम् अस्ति , तत् चीयताम् -

i बालकाः फलानि ---------------|   क. खादति ख. खादन्ति ग. खाद्यन्ते घ. खादसि

ii सः ------------------ लिखति | क. लेखम् ख. लेखा ग. लेखः घ. लेखान्

iii विद्वान् सर्वैः -------------------|   क. पूज्यन्ते ख. पूज्यते ग. पूजयन्ति घ. पूज्येते

iv ---------------- गीता पठ्यते |   क. भक्ताः ख. भक्तेन ग. भक्तः घ. भक्तम्

**खण्ड [घ][पठित - अवबोधनम्]**

**गद्यांशः**

**अधोलिखितं गद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

**तच्छुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् -रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ | अहं तु वनं गच्छामि |अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः | ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकट्स्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति |**

**I एकपदेन उत्तरत -**

**i मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?**

**ii जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?**

**II पूर्णवाक्येन उत्तरत -**

**i यूथपतिः सगद्गदम् किम् उक्तवान् ?**

**ii अन्यास्मिन् अहनि मेषः कुत्र प्रविशति ?**

**III भाषिककार्यम्**

**i दिने इति पदस्य पर्यायपदं अत्र किम् ? क.अन्यस्मिन् ख.यावत् ग. अहनि घ. अथ**

**ii प्रविशति इति क्रियापदस्य कर्तृपदं किम् ? क. यूथपतिः ख. वयम् ग. मेषः घ. कपयः**

**iii सुखस्य इति पदस्य किं विलोमपदं प्रयुक्तम् ? क. कुपरिणामं ख. निकटता ग. अश्वशालां घ.दुःखस्य**

**iv तच्छुत्वा साश्रुनयनो यूथपतिः किम् भूत्वा उक्तवान् ?क.सगद्गदम् ख. उर्णाप्रचुरःग.कुपरिणामं घ.यूथपतिः**

**पद्यांशः**

**अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

**चञ्चलं हि मनः कृष्णः ! प्रमाथि बलवद् दृढम् |**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करः ||**

**I एकपदेन उत्तरत -**

**i चञ्चलं किम् अस्ति ?**

**ii मनसः निग्रहं कस्य इव दुष्करम् ?**

II पूर्णवाक्येन उत्तरत -

i मनः कीदृशम् अस्ति ?

ii प्रमाथि किम् दृढम् ?

III भाषिककार्यम्

i मन्ये इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ? क.अहम् ख. भवान् ग. कृष्णाःघ. अर्जुनः

ii मथनशीमम् इत्यर्थे किं पदम् अत्र प्रयुक्तम् ? क.प्रमाथि ख. मनः ग. चञ्चलं घ. निग्रहं

iii चञ्चलम् मनः कं प्रति प्रयुक्तम् ? क. कृष्णः ख. काकः ग. दृढम् घ. सुदुष्करम्

iv सुदुष्करम् इति पदस्य पर्यायपदं किम् ? क. कठिनम् ख. करलम् ग. सुन्दरम् नयनम्

नाट्यांशः

छात्राः - गुरुवर ! जातकं किं भवति ?

आचार्यः - जातक अर्थात् जन्म | 'जातकमाला' इति नाम्नि पुस्तके भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति | एतासु कथासु परहिताय सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम् | एतादृशीम् एकां कथां कथयामि |

छात्राः - एवम् ! वयम् एतादृशीं कथां श्रोतुम् उत्सुकाः |

आचार्यः - श्रूयताम् तावत् | बौद्धाचार्यस्य आर्यशूरस्य जातकमालायाः शिविजातक -आधारिता एषा कथा |

I एकपदेन उत्तरत -

i 'जातकमाला' इति नाम्नि पुस्तके कस्य पूर्वजन्मनः विविधाः कथाः सन्ति ?

ii अचार्यः छात्रान् कां श्रावयति ?

II पूर्णवाक्येन उत्तरत -

i जातकमालायाः कथासु किं शिक्षितम् ?

ii जातकमाला कस्याम् आधारिता कथा ?

III भाषिककार्यम्

i आत्महिताय इति पदस्य कः विपर्ययः अत्र आगतः ? क. कथां ख. कथाः ग. विविधाः घ. परहिताय

ii विविधाः कथाः अनयोः पदयोः विशेषणपदं किम् ? क. विविधाः ख. विविधा ग. कथाः घ. कथां

मञ्जूषातः समुचितं पदं चित्वा अधोलिखित श्लोकस्य अन्वय पूर्तिं कुरुत -

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति |

व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ||

अन्वयः i-------- तव अयम् कोशः कः अपि तव ii ----------- विद्यते | व्ययतः iii -------------आयाति iv -------------- च क्षयम् आयाति |

| | |
|---|---|
| खण्ड -क अपठित -अवबोधनम् - | 10 |
| खण्ड- ख रचनात्मककार्यम् - [ पत्रलेखनम् , चित्रवर्णनम् ] | 15 |
| खण्ड- ग अनुप्रयुक्त-व्याकरणम् -[ सन्धि , समास ,प्रत्यय, अव्यय , समय लेखनम् ] | 25 |
| खण्ड -घ पठित -अवबोधनम् - [गद्यांशम् ,पद्यांशम् ,नाट्यांशम् ,अन्वयं,प्रश्ननिर्माणम्,कथाक्रमानुसारम्] | 30 |

*****